# Shrirama Manasi and Bahih Puja Vidhi Vidhanam

# શ્રીરામ માનસી બહિઃ ચ પૂજા વિધિવિધાનમ્

## Document Information

Text title : shrIrAmapUjAvidhividhAnam mAnasI and bAyhaH from Anandaramayana

File name : shrIrAmapUjAvidhividhAnamAnanda.itx

Category : raama, pUjA

Location : doc_raama

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Source : AnandarAmAyaNa manoharakhanda sarga 3

Latest update : January 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2021

*sanskritdocuments.org*

# શ્રીરામ માનસી બહિઃ ચ પૂજા વિધિવિધાનમ્

## શ્રીરામમાનસી પૂજા વિધિવિધાનમ્

સુતીક્ષ્ણસ્ત્વેકદાઽગસ્ત્યં દૃષ્ટ્વા રહસિ સંસ્થિતમ્ ।
પ્રણમ્ય પરયા ભક્ત્યા પ્રોવાચ વિનયાન્વિતઃ ॥ ૫૪॥

સુતીક્ષ્ણ ઉવાચ ।
હૃદયે માનસી પૂજા કીદૃશી ચ વદ પ્રભો ।
ઉપચારૈઃ કતિવિધૈઃ પૂજ્યતે રઘુનન્દનઃ । ૫૫॥

અગસ્ત્ય ઉવાચ ।
રામં પદ્મવિશાલાક્ષં કાલામ્બુદસમપ્રભમ્ ।
સ્મિતવક્ત્રં સુખાસીનં ચિન્તયેચ્ચિત્તપુષ્કરે ॥ ૫૬॥

રાગાદિકલુષં ચિત્તં વૈરાગ્યેણ સુનિર્મલમ્ ।
કૃત્વા ધ્યાયેત્સદા રામં ભવબન્ધવિમુક્તયે ॥ ૫૭॥

પ્રાતઃ શુદ્ધવપુર્ભૂત્વા શૌચાદિભિરતદ્રિતઃ ।
વિવિક્તદેશમાશ્રિત્ય ધ્યાનપૂજા સમારભેત્ ॥ ૫૮॥

નાભિકુન્દસમુદ્ભૂતં કદલીકુસુમોપમમ્ ।
અષ્ટપત્રં સ્નિગ્ધવર્ણં ધ્યાયેદ્ધૃદયપઙ્કજમ્ ॥ ૫૯॥

તત્પદ્મં રામનામ્નૈવ ફુલ્લં કૃત્વાઽસ્ય મધ્યમે ।
ભાવયેત્સૂર્યસોમાગ્નિમણ્ડલાનુત્તરોત્તરમ્ ॥ ૬૦॥

તસ્યોપરિ ન્યસેદ્દિવ્યં પીઠં રત્નમયોજ્જ્વલમ્ ।
તન્મધ્યે રાઘવં ધ્યાયેત્સૂર્યકોટિસમપ્રભમ્ ॥ ૬૧॥

ઇન્દીવરનિભં શાન્તં વિશાલાક્ષં સુવક્ષસમ્ ।
ઉદ્યદ્દીધિતમદ્ભાસ્વત્કુણ્ડલાભ્યાં વિરાજિતમ્ ॥ ૬૨॥

સુનાસં સુકિરીટં ચ સુકપોલં શુચિસ્મિતમ્ ।

વિજ્ઞાનમુદ્રં દ્વિભુજં કમ્બુગ્રીવં સુકુન્તલમ્ ॥ ૬૩॥

નાનારત્નમયૈર્દિવ્યહારૈર્ભૂષિતમવ્યયમ્ ।
વિદ્યુત્પુઞ્જપ્રતીકાશં વસ્ત્રયુગ્મધરં હરિમ્ ॥ ૬૪
વીરાસનસ્થં સન્તાનતરુમૂલનિવાસિનમ્ ।
મહાસુગન્ધલિપ્તાઙ્ગં વનમાલાવિરાજિતમ્ ॥ ૬૫॥

વામપાર્શ્વે સ્થિતાં સીતાં ચામીકરસમપ્રભામ્ ।
લીલાપદ્મધરાં દેવીં ચારુહાસાં શુભાનનામ્ ॥ ૬૬॥

પશ્યન્તીં સ્નિગ્ધયા દૃષ્ટ્યા દિવ્યાં કલ્પવિરાજિતામ્ ।
છત્રચામરહસ્તેન લક્ષ્મણેન સુસેવિતમ્ ॥ ૬૭॥

હનુમત્પ્રમુખૈર્નિત્યં વાનરૈઃ પરિવારિતમ્ ।
સ્તૂયમાનં ઋષિગણૈઃ સેવિતં ભરતાદિભિઃ ॥ ૬૮॥

સનન્દનાદિભિશ્ચાન્યૈર્યોગિવૃન્દૈઃ સ્તુતં સદા ।
સર્વશાસ્ત્રાર્થકુશલં યોગજ્ઞં યોગસિદ્ધિદમ્ ॥ ૬૯॥

એવં ધ્યાત્વા રામચન્દ્રં મણિદ્વયસુશોભિતમ્ ।
શુદ્ધેન મનસા રામં પૂજયેત્સતતં હૃદિ ॥ ૭૦॥

ઇતિ ધ્યાનમ્ ।
આવાહયામિ વિશ્વેશં જાનકીવલ્લભં વિભુમ્ ।
કૌસલ્યાતનયં વિષ્ણું શ્રીરામં પ્રકૃતેઃ પરમ્ ॥ ૭૧॥

રાજાધિરાજ રાજેન્દ્ર રામચન્દ્ર મહીપતે ।
રત્નસિંહાસનં તુભ્યં દાસ્યામિ સ્વીકુરુ પ્રભો ॥ ૭૨॥

શ્રીરામાગચ્છ ભગવન્ રઘુવીર રઘૂત્તમ ।
જાનક્યા સહ રાજેન્દ્ર સુસ્થિરો ભવ સર્વદા ॥ ૭૩॥

રામચન્દ્ર મહેષ્વાસ રાવણાન્તક રાઘવ ।
યાવત્પૂજા સમાપ્યેઽહં તાવત્ત્વં સન્નિધૌ ભવ ॥ ૭૪॥

રઘુનન્દન રાજર્ષે રામ રાજીવલોચન ।
રઘુવંશજ મે દેવ શ્રીરામાભિમુખો ભવ ॥ ૭૬॥

પ્રસીદ જાનકીનાથ સુપ્રસિદ્ધ સુરેશ્વર ।
પ્રસન્નો ભવ મે રાજન્ સર્વેશ મધુસૂદન ॥ ૭૬॥

શરણં મે જગન્નાથ શરણં ભક્તવત્સલ ।
વરદો ભવ મે રાજન્ શરણં મે રઘૂત્તમ ॥ ૭૭॥

ત્રૈલોક્યપાવનાનન્ત નમસ્તે રઘુનાયક ।
પાદ્યં ગૃહાણ રાજર્ષે નમો રાજીવલોચન ॥ ૭૮॥

પરિપૂર્ણ પરાનન્દ નમો રામાય વેધસે ।
ગૃહાણાર્ઘ્યં મયા દત્તં કૃષ્ણ વિષ્ણો જનાર્દન ॥ ૭૯॥

ૐ નમો વાસુદેવાય તત્ત્વજ્ઞાનસ્વરૂપિણે ।
મધુપર્કં ગૃહાણેમં રાજારાજાય તે નમઃ ॥ ૮૦॥

નમઃ સત્યાય શુદ્ધાય બુદ્ધાય જ્ઞાનરૂપિણે ।
ગૃહાણાચમનં દેવ સર્વલોકૈકનાયક ॥ ૮૧॥

બ્રહ્માણ્ડોદરમધ્યસ્થૈસ્તીર્થૈશ્ચ રઘુનન્દન ।
સ્નાપયિષ્યામ્યહં ભક્ત્યા ત્વં ગૃહાણ જનાર્દન ॥ ૮૨॥

સન્તપ્તકાઞ્ચનપ્રખ્યં પીતામ્બરમિમં હરે ।
સઙ્ગૃહાણ જગન્નાથ રામચન્દ્ર નમોઽસ્તુ તે ॥ ૮૩॥

શ્રીરામાચ્યુત યજ્ઞેશ શ્રીધરાનન્દ રાઘવ ।
બ્રહ્મસૂત્રં સોત્તરીયં ગૃહાણ રઘુનાયક ॥ ૮૪॥

કિરીટહારકેયૂરરત્નકુણ્ડલમેખલાઃ ।
ગ્રૈવેયકૌસ્તુભં હારં રત્નકઙ્કણનૂપુરાન્ ॥ ૮૫॥

એવમાદીનિ સર્વાણિ ભૂષણાનિ રઘૂત્તમ ।
અહં દાસ્યામિ તે ભક્ત્યા સઙ્ગૃહાણ જનાર્દન ॥ ૮૬॥

કુઙ્કુમાગરુકસ્તૂરીકર્પૂરોન્મિશ્રચન્દનમ્ ।
તુભ્યં દાસ્યામિ વિશ્વેશ શ્રીરામ સ્વીકુરુ પ્રભો ॥ ૮૭॥

તુલસીકુન્દમન્દારજાતિપુન્નાગચમ્પકૈઃ ।
કદમ્બકરવીરૈશ્ચ કુસુમૈઃ શતપત્રકૈઃ ॥ ૮૮॥

નીલામ્બુજૈર્વિલ્વદલૈઃ પુષ્પમાલ્યૈશ્ચ રાઘવ ।
પૂજયિષ્યામ્યહં ભક્ત્યા સઙ્ગૃહાણ નમોઽસ્તુ તે ॥ ૮૯॥

વનસ્પતિરસૈર્દિવ્યગન્ધાઢ્યૈઃ સુમનોહરૈઃ ।
રામચન્દ્ર મહીપાલ ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ ૯૦।

જ્યોતિષાં પતયે તુભ્યં નમો રામાય વેધસે ।
ગૃહાણ દીપકં રાજંસ્ત્રૈલોક્યતિમિરાપહમ્ ॥ ૯૧॥

ઇદં દિવ્યાન્નમમૃતં રસૈઃ ષડ્ભિર્વિરાજિતમ્ ।
શ્રીરામ રાજરાજેન્દ્ર નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥ ૧૨॥

નાગવલ્લીદલૈર્યુક્તં પૂગીફલસમન્વિતમ્ ।
તામ્બૂલં ગૃહ્યતાં રામ કર્પૂરાદિસમન્વિતમ્ ॥ ૯૩॥

મઙ્ગલાર્થં મહીપાલ નીરાજનમિદં હરે ।
સઙ્ગૃહાણ જગન્નાથ રામચન્દ્ર નમોઽસ્તુ તે ॥ ૯૪॥

## અથ નમસ્કારાષ્ટકમન્ત્રાઃ

ૐ નમો ભગવતે શ્રીરામાય પરમાત્મને ।
સર્વભૂતાન્તરસ્થાય સસીતાય નમો નમઃ ॥ ૯૫॥

ૐ નમો ભગવતે શ્રીરામ રામચન્દ્રાય વેધસે ।
સર્વવેદાન્તવેદ્યાય સસીતાય નમો નમઃ ॥ ૯૬॥

ૐ નમો ભગવતે શ્રીવિષ્ણવે પરમાત્મને ।
પરાત્પરાય રામાય સસીતાય નમો નમઃ ॥ ૯૭॥

ૐ નમો ભગવતે શ્રીરઘુનાથાય શાર્ઙ્ગિણે ।
ચિન્મયાનન્દરૂપાય સસીતાય નમો નમઃ ॥ ૯૮॥

ૐ નમો ભગવતે શ્રીરામ શ્રીકૃષ્ણાય ચક્રિણે ।
વિશુદ્ધજ્ઞાનદેહાય સસીતાય નમો નમઃ ॥ ૯૯॥

ૐ નમો ભગવતે શ્રીવાસુદેવાય વિષ્ણવે ।
પૂર્ણાનન્દૈકરૂપાય સસીતાય નમો નમઃ ॥ ૧૦૦॥

ૐ નમો ભગવતે શ્રીરામ રામભદ્રાય વેધસે ।
સર્વલોકશરણ્યાય સસીતાય નમો નમઃ ॥ ૧૦૧॥

ૐ નમો ભગવતે શ્રીરામાયામિતતેજસે ।
બ્રહ્માનન્દૈકરૂપાય સસીતાય નમો નમઃ ॥ ૧૦૨॥

ઇતિ નમસ્કારાષ્ટકમન્ત્રાઃ ।

## શ્રીરામબહિઃપૂજાવિધિવિધાનમ્

નૃત્યગીતાદિવાદ્યાદિપુરાણપઠનાદિભિઃ ।
રાજોપચારૈરખિલૈઃ સન્તુષ્ટો ભવ રાઘવ ॥ ૧૦૩॥

વિશુદ્ધજ્ઞાનદેહાય રઘુનાથાય વિષ્ણવે ।
અન્તઃકરણસંશુદ્ધિં દેહિ મે રઘુનન્દન ॥ ૧૦૪॥

નમો નારાયણાનન્ત શ્રીરામ કરુણાનિધે ।
મામુદ્ધર જગન્નાથ ઘોરાત્સંસારસાગરાત્ ॥ ૧૦૫॥

રામચન્દ્ર મહેષ્વાસ શરણાગતતત્પર ।
પાહિ માં સર્વલોકેશ તાપત્રયમહાનલાત્ ॥ ૧૦૬॥

શ્રીકૃષ્ણ શ્રીકર શ્રીશ શ્રીરામ શ્રીનિધે હરે ।
શ્રીનાથ શ્રીમહાવિષ્ણો શ્રીનૃસિંહ કૃપાનિધે ॥ ૧૦૭॥

ગર્ભજન્મજરાવ્યાધિઘોરસંસારસાગરાત્ ।
મામુદ્ધર જગન્નાથ કૃષ્ણ વિષ્ણો જનાર્દન ॥ ૧૦૮॥

શ્રીરામ ગોવિન્દ મુકુન્દ કૃષ્ણ શ્રીનાથ વિષ્ણો ભગવન્નમસ્તે ।
પ્રૌઢારિષડ્વર્ગમહાભયેભ્યો માં ત્રાહિ નારાયણ વિશ્વમૂર્તે ॥ ૧૦૯॥

શ્રીરામાચ્યુત યજ્ઞેશ શ્રીધરાનન્દ રાઘવ ।
શ્રીગોવિન્દ હરે વિષ્ણો નમસ્તે જાનકીપતે ॥ ૧૧૦॥

બ્રહ્માનન્દૈકવિજ્ઞાનં ત્વન્નામસ્મરણં નૃણામ્ ।
ત્વત્પદામ્બુજસદ્ભક્તિં દેહિ મે રઘુવલ્લભ ॥ ૧૧૧।
નમોઽસ્તુ નારાયણ વિશ્વમૂર્તે નમોઽસ્તુ તે શાશ્વત વિશ્વયોને ।
ત્વમેવ વિશ્વં સચરાચરં ચ ત્વામેવ સર્વં પ્રવદન્તિ સન્તઃ ॥ ૧૧૨॥

નમોઽસ્તુ તે કારણકારણાય નમોઽસ્તુ કૈવલ્યફલપ્રદાય ।
નમો નમસ્તેઽસ્તુ જગન્મયાય વેદાન્તવેદ્યાય નમો નમસ્તે ॥ ૧૧૩॥

નમો નમસ્તે ભરતાગ્રજાય નમોઽસ્તુ યજ્ઞપ્રતિપાલનાય ।
અનન્ત યજ્ઞેશ હરે મુકુન્દ ગોવિન્દ વિષ્ણો ભગવન્મુરારે ॥ ૧૧૪॥

શ્રીવલ્લભાનન્ત જગન્નિવાસ શ્રીરામ રાજેન્દ્ર નમો નમસ્તે ।
શ્રીજાનકીકાન્ત વિશાલનેત્ર રાજાધિરાજ ત્વયિ મેઽસ્તુ ભક્તિઃ ॥ ૧૧૫॥

તપ્તજામ્બૂનદેનૈવ નિર્મિતં રત્નભૂષિતમ્ ।
સ્વર્ણપુષ્પં રઘુશ્રેષ્ઠ દાસ્યામિ સ્વીકુરુ પ્રભો ॥ ૧૧૬॥

હૃત્પદ્મકર્ણિકામધ્યે સીતયા સહ રાઘવ ।
નિવસ ત્વં રઘુશ્રેષ્ઠ સર્વૈરાવરણૈઃ સહ ॥ ૧૧૭॥

મનોવાક્કાયજનિતં કર્મ યદ્વા શુભાશુભમ્ ।
તત્સર્વં પ્રીતયે ભૂયાન્નમો રામાય શાર્ઙ્ગિણે ॥ ૧૧૮॥

અપરાધસહસ્રાણિ ક્રિયતેઽહર્નિશં મયા ।
દાસોઽયમિતિ માં મત્વા ક્ષમસ્વ રઘુપુઙ્ગવ ॥ ૧૧૯॥

નમસ્તે જાનકીનાથ રામચન્દ્ર મહીપતે ।
પૂર્ણાનન્દૈકરૂપ ત્વં ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥ ૧૨૦॥

એવં યઃ કુરુતે પૂજા બહિર્વા હૃદયેઽપિ ચ ।
સકૃત્પૂજનમાત્રેણ રામ એવ ભવેન્નરઃ ॥ ૧૨૧॥

કિં પુનઃ સતતં બ્રહ્મણ્યેવં પૂજ્ય સ્થિતો હિ સઃ ।
સર્વાન્કામાનવાપ્નોતિ ચેહ લોકે પરત્ર ચ । ૧૨૨॥

એવં સુતીક્ષ્ણ તે પ્રોક્તં યથા પૃષ્ટં ત્વયા મમ ।
હૃદયે માનસીપૂજાવિધાનં રાઘવસ્ય ચ ॥ ૧૨૩॥

શ્રીરામદાસ ઉવાચ ।
એવં શિષ્ય સુતીક્ષ્ણાય મુનયેઽગસ્તિના પુરા ।
યત્પ્રોક્તં તન્મયા સર્વં તવ પ્રોક્તં સવિસ્તરાત્ ॥ ૧૨૪॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગતે શ્રીમદાનન્દરામાયણે
વાલ્મીકીયે મનોહરકાણ્ડે તૃતીયસર્ગાન્તર્ગતં
શ્રીરામમાનસીપૂજાવિધિવિધાનં સમાપ્તમ્ ।

અથ બહિઃપૂજાવિધિવિધાનમ્ ।
શિષ્યાધુના બહિઃપૂજાવિધાનં ચ મયોચ્યતે ।
નરઃ પ્રાતઃ સમુત્થાય કૃત્વા શૌચાદિકાઃ ક્રિયાઃ ૧૨૫॥

સ્નાત્વા સન્ધ્યાદિકં કૃત્વા દેવપૂજાં સમારભેત્ ।
તીર્થે દેવાલયે વાઽપિ ગોષ્ઠે પુણ્યસ્થલેષુ ચ ॥ ૧૨૬॥

નદ્યાસ્તટે દેવગેહે તુલસીસન્નિધૌ તથા ।

લિપ્ત્વા ભૂમિં ગોમયેન તતો પદ્માનિ લેખયેત્ ॥ ૧૨૭॥

સિતરક્તહરિત્પીતનીલકૃષ્ણાદિસમ્ભવઃ ।
નાનાવર્ણૈશ્ચિત્રિતાનિ તત્ર પૂજા સમારભેત્ ॥ ૧૨૮॥

અષ્ટોત્તરસહસ્રશ્રીરામલિઙ્ગાત્મકાસનમ્ ।
વાષ્ટોત્તરશતં શ્રીમદ્રામલિઙ્ગાત્મકાસનમ્ ॥ ૧૨૯॥

અષ્ટોત્તરસહસ્રશ્રીરામભદ્રાસનં હિ વા ।
વાષ્ટોત્તરશતં શ્રીમદ્રામભદ્રાસનં શુભમ્ ॥ ૧૩૦॥

બહૂન્યન્યાનિ શતશઃ સન્તિ લબ્ધ્વાસનાનિ હિ ।
તેષાં મધ્યાદેકમેવાસનં સંસ્થાપ્ય ચિત્રિતમ્ ॥ ૧૩૧॥

પીઠોપરિ કૃતં વસ્ત્રં પત્રાદિષ્વપિ વા કૃતમ્ ।
આસનોપરિ જાનક્યા રાઘવાદીન્નિવેશયેત્ ॥ ૧૩૨॥

આસને સર્વતોભદ્રમધ્યે પદ્મોપરિ ન્યસેત્ ।
સીતયા રાઘવં રમ્યં વરસિંહાસને સ્થિતમ્ ॥ ૧૩૩॥

રામસ્ય પૃષ્ઠભાગે ચ લક્ષ્મણં સ્થાપયેત્તતઃ ।
રામસ્ય દક્ષિણે પાર્શ્વે ભરતં વિન્યસેચ્છુભમ્ ॥ ૧૩૪॥

રામસ્ય વામપાર્શ્વે હિ શત્રુઘ્નં વિન્યસેચ્છુભમ્ ।
પુરતો રામચન્દ્રસ્ય વાયુપુત્રં તુ વિન્યસેત્ ॥ ૧૩૫॥

રામસ્ય વાયુદિગ્ભાગે સુગ્રીવં સ્થાપયેત્તતઃ ।
ઈશાન્યાં રામચન્દ્રસ્ય વિન્યસ્ય ચ વિભીષણમ્ ॥ ૧૩૬॥

રામસ્ય વહ્નિદિગ્ભાગે વિન્યસેદઙ્ગદં તતઃ ।
નૈરૃત્યાં રામચન્દ્રસ્ય જામ્બવન્તં તુ વિન્યસેત્ ॥ ૧૩૭॥

પૂજ્યપૂજકયોર્મધ્યે પ્રાગ્દિગ્જ્ઞેયાઽર્ચને ત્વિહ ।
સર્વશાસ્ત્રેષ્વેવમેવ નિર્ણયઃ કથ્યતે બુધૈઃ ॥ ૧૩૮॥

લક્ષ્મણસ્ય કરે દેયં છત્રં મુક્તાવિરાજિતમ્ ।
ભરતસ્ય કરે દેયં ચામરં રુક્મમણ્ડિતમ્ ॥ ૧૩૯॥

શત્રુઘ્નસ્ય કરે દેયં વ્યજનં ચિત્રિતં શુભમ્ ।
હનૂમતઃ કરે દેયં રામસ્ય પાદુકાદ્વયમ્ ॥ ૧૪૦॥

સુગ્રીવસ્ય કરે દેયં જલપાત્રં મનોહરમ્ ।
કરે વિભીષણસ્યાપિ દેયં મુકુરમુત્તમમ્ ॥ ૧૪૧॥

દેયં તામ્બૂલપાત્રં ચ વાલિનન્દનસત્કરે ।
જામ્બવતઃ કરે દેયો વનકોશો મહત્તમઃ ॥ ૧૪૨॥

નવાયતનમેવં હિ સ્થાપયેદ્રાઘવસ્ય ચ ।
અથવા પઞ્ચાયતનં સ્થાપયેદાસનોપરિ ॥ ૧૪૩॥

સીતાયા રામચન્દ્રસ્ય મધ્યે પૃષ્ઠે તુ લક્ષ્મણમ્ ।
ભરતં સવ્યપાર્શ્વે ચ શત્રુઘ્નં વામપાર્શ્વકે ॥ ૧૪૪॥

પુરતો વાયુપુત્રં ચ પૂર્વોક્તૈરુપચારકૈઃ ।
એવં સંસ્થાપયેદ્ભક્ત્યા રામં ભદ્રાસનોપરિ ॥ ૧૪૫॥

અથવા સીતયા રામં મધ્યે સ્થાપ્ય તતઃ પરમ્ ।
રામસ્ય પૃષ્ઠે સૌમિત્રિં રામાગ્રે વાયુનન્દનમ્ ॥ ૧૪૬॥

સ્થાપ્યૈવં પૂજયેદ્ભક્ત્યા રામં ધૃતશરાસનમ્ ।
અથવા સીતયા રામં લક્ષ્મણં પરિપૂજયેત્ ॥ ૧૪૭॥

સીતાનુજૌ વિના પૂજા રામસ્યૈકસ્ય નાચરેત્ ।
કૃતા ચેદ્વિઘ્નકર્ત્રી સા ભવેદત્ર ન સંશયઃ ॥ ૧૪૮॥

નવાયતનપૂજા સા શ્રેષ્ઠા જ્ઞેયા શુભપ્રદા ।
યા પઞ્ચાયતની પૂજા જ્ઞેયા સા મધ્યમાઽત્ર હિ ॥ ૧૪૯॥

ત્રિદૈવત્યા તુ યા પૂજા કનિષ્ઠા સા નિગદ્યતે ।
અતિકનિષ્ઠા પૂજા સા દ્વિદૈવત્યા સ્મૃતા હિ સા ॥ ૧૫૦॥

કોદણ્ડં વામહસ્તે ચ તૂણીરં વામપાર્શ્વકે ।
નિજનામાઙ્કિતં બાણં દધાનં દક્ષિણે કરે ॥ ૧૫૧॥

એવં શ્રીરાઘવં સ્થાપ્ય તતઃ પૂજાં સમારભેત્ ।
આત્મનો વામભાગે ચ જલકુમ્ભં નિધાય હિ ॥ ૧૫૨॥

આત્મનો દક્ષિણે ભાગે પૂજાપાત્રં નિવેશયેત્ ।
આત્મનઃ પુરતઃ પાત્રં સ્થાપયેદ્વિસ્તૃતં વરમ્ ॥ ૧૫૩॥

પ્રાઙ્મુખઃ સુખમાસીનો ધૃતપદ્માસનઃ શુચિઃ ।
મૌની ધૃતાક્ષતુલસીમાલો નિશ્ચલમાનસઃ ॥ ૧૫૪॥

બદ્ધગ્રન્થિશિખઃ શુદ્ધવસ્ત્રો ધૃતપવિત્રકઃ ।
શુદ્ધદ્વારાવતીમૃત્કૃત્તિલકો મુદ્રિકાઙ્કિતઃ ॥ ૧૫૬॥

નત્વાઽઽદૌ ગણરાજં ચ તિથિવારાદિ કીર્તયેત્ ।
ભૂમિશુદ્ધિં ભૂતશુદ્ધિં ન્યાસૌ કૃત્વા યથાક્રમમ્ ।
પ્રોક્ષણીપાત્રમેકં તુ જલપૂર્ણં પ્રકારયેત્ ॥ ૧૫૬॥

દૂર્વાગન્ધાક્ષતપુષ્પૈસ્તત્પાત્રં પરિપૂરયેત્ ।
પ્રોક્ષયેત્તેન નીરેણ પૂજાદ્રવ્યં સહાત્મના ॥ ૧૫૭॥

પાદ્યાર્ઘ્યાચમનાર્થં તુ ત્રીણિ પાત્રાણિ વિન્યસેત્ ।
ગણરાજં પૂજયિત્વા સમ્પૂજ્ય વરુણં તતઃ ॥ ૧૫૮॥

પાઞ્ચજન્યં પૂજયિત્વા પ્રોક્ષયેતજ્જલૈરપિ ।
પૂજાદ્રવ્યં પૂર્વવચ્ચ સ્વાત્માનં ચ ભુવં તથા ॥ ૧૫૯॥

ધેનુશઙ્ખચક્રપક્ષિરાજમુદ્રાઃ પ્રદર્શયેત્ ।
શૈલી દારુમયી લૌહી લેપ્યા લેખ્યા ચ સૈકતી ॥ ૧૬૦॥

મનોમયી મણિમયી પ્રતિમાઽષ્ટવિધા સ્મૃતા ।
અથ ધ્યાયેદ્રામચન્દ્રં સસીતં પુરતઃ સ્થિતમ્ ॥ ૧૬૧॥

દ્વિભુજં ધૃતતૂણીરં ચાપબાણધૃતાયુધમ્ ।
દિવ્યાલઙ્કારસંયુક્તં પીતકૌશેયવાસસમ્ ॥ ૧૬૨॥

સલક્ષ્મણં સશત્રુઘ્નં ભરતેન સમન્વિતમ્ ।
હનુમત્સેવિતપદં સિંહાસનવિરાજિતમ્ ॥ ૧૬૩॥

સિતછત્રસમાયુક્તં દિવ્યચામરવીજિતમ્ ।
વિભીષણસમાયુક્તં સુગ્રીવપરિવન્દિતમ્ ॥ ૧૬૪॥

જામ્બવતા સમાયુક્તમઙ્ગદેન પરિષ્ટુતમ્ ।
અયોધ્યાવાસિનં રામમેવં હૃદિ વિચિન્તયેત્ ॥ ૧૬૫॥

સીતારામ સમાગચ્છ મદગ્રે ત્વં સ્થિરો ભવ ।
ગૃહાણ પૂજાં મદ્દત્તાં કૃતમાવાહનં તવ ॥ ૧૬૬॥

હિરણ્મયં રત્નયુક્તં નાનાચિત્રવિચિત્રિતમ્ ।
સિંહાસનં સવસ્ત્રં ચ હ્યાસનાર્થં દદામિ તે ॥ ૧૬૭॥

ચન્દનાગુરુસંયુક્તૈર્જલૈસ્તીર્થસમુદ્ભવૈઃ ।
પાદ્યં ગૃહાણ શ્રીરામ મયા દત્તં પ્રસીદ મે ॥ ૧૬૮॥

પુષ્કરાદિષુ તીર્થેષુ ગઙ્ગાદિષુ સરિત્સુ ચ ।
યત્તોયં તન્મયાઽઽનીતં દત્તમર્ઘ્યં ગૃહાણ ભોઃ । ૧૬૯।
સુગન્ધવાસિતં તોયં બહુતીર્થસમુદ્ભવમ્ ।
આચમનાર્થમાનીતં ગૃહાણ ત્વં સુરેશ્વર ॥ ૧૭૦॥

હરિદ્રાકુઙ્કુમૈર્યુક્તં સુગન્ધદ્રવ્યમિશ્રિતમ્ ।
સુગન્ધસ્નેહસમ્મિશ્રમુદ્વર્ત્તનમથાસ્તુ તે ॥ ૧૭૧॥

કામધેનૂદ્ભવં ક્ષીરં નન્દિન્યા દધિ સુન્દરમ્ ।
કપિલાયા ઘૃતં શ્રેષ્ઠં મધુ વિન્ધ્યાદ્રિસમ્ભવમ્ ॥ ૧૭૨॥

સિતોપલસમાનામ સિતાયુક્તં મનોહરમ્ ।
પઞ્ચામૃતં મયાઽઽનીતં સ્નાનાર્થં ત્વં ગૃહાણ ભોઃ ॥ ૧૭૩॥

ગઙ્ગા ચ યમુના ચૈવ ગોદાવરી સરસ્વતી ।
નર્મદા સિન્ધુ કાવેરી સરયૂ ગણ્ડકી તથા ॥ ૧૭૪॥

તામ્રપર્ણી ભીમરથી કૃષ્ણા વેણી મહાનદી ।
ગોમતી સાગરાઃ સપ્ત પયોષ્ણી ભવનાશિની ॥ ૧૭૫॥

પૂર્ણા તાપી તુઙ્ગભદ્રા ક્ષિપ્રા વેગવતી તથા ।
પિનાકી પ્રવરા સિન્ધુફેણા સાર્દ્ધત્રયો નદાઃ । ૧૭૬॥

ઘૃતમાલા કૃતમાલા મહી નિક્ષેપિકા તથા ।
પયોષ્ણી પ્રેમગઙ્ગા ચ ચિત્રગઙ્ગા કરાનદી ॥ ૧૭૭॥

નીરા ચર્મણ્વતી વૃદ્ધા બઞ્જરા ચ પુનઃ પુનઃ ।
સિન્ધુક્ષીરા ચ વૈકુણ્ઠાઽલકનન્દા ચ વારણા ॥ ૧૭૮॥

ઇત્યાદિસર્વતીર્થેષુ યત્તોયં વર્તતે શુભમ્ ।
તન્મયાઽઽનીતમદ્યાત્ર સ્નાનં કુરુ રઘૂત્તમ ॥ ૧૭૯॥

પુનરાચમનં રમ્યં સર્વતીર્થસમુદ્ભવમ્ ।
ગૃહાણ રઘુનાથ ત્વં દીયતે યન્મયા તવ ॥ ૧૮૦॥

સુવર્ણતન્તુભિશ્ચિત્રં પીતકૌશેયસમ્ભવમ્ ।
વસ્ત્રયુગ્મં પ્રદાસ્યામિ ગૃહાણ રઘુનાયક ॥ ૧૮૧॥

શુદ્ધં હેમમયં રમ્યં નવતન્તુસમુદ્ભવમ્ ।
બ્રહ્મગ્રન્થિસમાયુક્તં બ્રહ્મસૂત્રં પ્રગૃહ્યતામ્ ॥ ૧૮૨॥

મુકુટં કુણ્ડલે રમ્યે મુદ્રિકાઃ કઙ્કણે તથા ।
નૂપુરે રશનામાલાઃ કેયૂરે રત્નમણ્ડિતે ॥ ૧૮૩॥

ઇત્યાદીન્પરમાન્ દિવ્યાન્સ્વર્ણમાણિક્યનિર્મિતાન્ ।
ત્વદર્થં ચ મયાઽઽનીતાનલઙ્કારાન્ ગૃહાણ ભોઃ ॥ ૧૮૪॥

છત્રં સવ્યજનં રમ્યં ચામરદ્વયસંયુતમ્ ।
ત્વદર્થં ચ મયાઽઽનીતં ગૃહ્ણીષ્વ રિપુસૂદન ॥ ૧૮૫॥

સુગન્ધં ચન્દનં દિવ્યં કૃષ્ણાગુરુવિમિશ્રતમ્ ।
રક્તચન્દનસંયુક્તં ગૃહ્ણીષ્વ ત્વં મયાઽર્પિતમ્ ॥ ૧૮૬॥

અક્ષતાંશ્ચ વરાન્ દિવ્યાન્મુક્તાફલવિનિર્મિતાન્ ।
કસ્તૂર્યા કુઙ્કુમેનાક્તાન્ ગૃહાણ પરમેશ્વર ॥ ૧૮૭।
માલ્યાદીનિ સુગન્ધીનિ માલત્યાદીનિ વૈ પ્રભો ।
મયાઽઽહૃતાનિ પૂજાર્થં ગૃહાણ રઘુનાયક ॥ ૧૮૮॥

વનસ્પતિરસોદ્ભૂતં ગન્ધાઢ્યં ગન્ધમુત્તમમ્ ।
આઘ્રેયં સર્વદેવાનાં ધૂપં ગૃહ્ણીષ્ય રાઘવ ॥ ૧૮૯॥

સાજ્યં ત્રિવર્તિસંયુક્તં વહ્નિના યોજિતં મયા ।
દીપં ગૃહાણ ભો રામ ત્રૈલોક્યતિમિરાપહમ્ ॥ ૧૯૦॥

ભક્ષ્યભક્તેન સંયુક્તં સપાયસઘૃતાન્વિતમ્ ।
શર્કરામધુસંયુક્તં નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥ ૧૯૧॥

આમ્રાદીનિ સુપક્વાનિ ફલાનિ વિવિધાનિ ચ ।
સમર્પિતાનિ તે રામ ગૃહ્ણીષ્વ રઘુનન્દન ॥ ૧૯૨॥

પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ ।
જાતીચતુષ્ટયયુતં તામ્બૂલં સ્વીકુરુ પ્રભો ॥ ૧૯૩॥

હિરણ્યં બ્રહ્મસમ્ભૂતં વહ્નિતેજઃસમુદ્ભવમ્ ।
દીયતે દક્ષિણાર્થં તે ગૃહ્ણીષ્વ રઘુનન્દન ॥ ૧૯૪॥

એવં મયા ષોડશકોપચારાઃ
સવિસ્તરં તે કથિતાઃ શિશોઽત્ર ।

આવાહનાદ્યાશ્ચ હિ દક્ષિણાન્તાઃ
શેષાં ચ પૂજાં સકલાં હિ વક્ષ્યે ॥ ૧૯૫॥

પઞ્ચવર્તિસમાયુક્તં કપિલાऽऽજ્યવિમિશ્રિતમ્ ।
વહ્નિના યોજિતં રમ્યં ગૃહ્ણીષ્વ ત્વં નિરાજનમ્ ॥ ૧૯૬॥

જાતી ચમ્પકમન્દારૌ કેતકી તુલસી તથા ।
દમનો મુનિકુન્દે ચ હ્યનન્તં ત્વિતિ વૈ નવ ॥ ૧૯૭॥

એભિર્નવવિધૈઃ પુષ્પૈર્મન્ત્રપુષ્પાણિ રાઘવ ।
મયાऽર્પિતાનિ ગૃહ્ણીષ્વ પ્રસીદ પરમેશ્વર ॥ ૧૯૮॥

યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ ।
તાનિ સર્વાણિ નશ્યન્તુ પ્રદક્ષિણં પદે પદે ॥ ૧૯૯॥

ઉરસા શિરસા દૃષ્ટ્યા મનસા વચસા તથા ।
પદ્ભ્યાં કરાભ્યાં જાનુભ્યાં સાષ્ટાઙ્ગઞ્ચ નમોऽસ્તુતે ॥ ૨૦૦॥

આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાં ચૈવ ન જાનામિ ક્ષમ્યતાં પરમેશ્વર ॥ ૧૦૧।
મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં રઘૂત્તમ ।
યત્પૂજિતં મયા દેવ પરિપૂર્ણં તદસ્તુ મે ॥ ૨૦૨॥

એવં શ્રીરામચન્દ્રસ્ય ભક્ત્યા કાર્યં પ્રપૂજનમ્ ।
નિરન્તરં તથા કાર્યં નવમ્યાં ચ વિશેષતઃ ॥ ૨૦૩॥

વિષ્ણુદાસ ઉવાચ ।
ગુરો નવવિધૈઃ પુષ્પૈસ્ત્વયા પુષ્પાઞ્જલિઃ કથમ્ ।
નિવેદિતોऽત્ર રામસ્ય પૂજને તદ્વદસ્વ મામ્ ॥ ૨૦૪॥

ત્વત્તો નાનાવિધાઃ પૂજાઃ સુરાણાં ચ મયા શ્રુતાઃ ।
પૂર્વં તાસુ શ્રુતો નૈવ નવપુષ્પાઞ્જલિઃ કદા ॥ ૨૦૫॥

શ્રીરામદાસ ઉવાચ ।
સમ્યક્પૃષ્ટં ત્વયા શિષ્ય સાવધાનમનાઃ શ◌ૃણુ ।
આસીત્પુરા દ્વિજવરઃ કાવેર્યા ઉત્તરે તટે ॥ ૨૦૬॥

રામનાથપુરે કશ્ચિત્સુન્દરાખ્યોऽતિભક્તિમાન્ ।
તસ્યાસન્નવ પુત્રાશ્ચ રામચિન્તનતત્પરાઃ ॥ ૨૦૭॥

ચન્દ્રોઽતિચન્દ્રશ્ચન્દ્રાભશ્ચન્દ્રાસ્યશ્ચન્દ્રશેખરઃ ।
ચન્દ્રાંશુર્જિતચન્દ્રશ્ચ ચન્દ્રચૂડોઽષ્ટમઃ સ્મૃતઃ ॥ ૨૦૮॥

રામચન્દ્રશ્ચેતિ નવ ગ્રહા ભાશ્ચ નવ સ્મૃતાઃ ।
એકદા તે ત્વયોધ્યાયાં રામં ભક્તકૃપાકરમ્ ॥ ૨૦૯॥

પ્રષ્ટું યયુશ્ચૈત્રમાસે તસ્થુસ્તે સરયૂતટે ।
તાવત્તત્ર સમાયાતા નાનાદેશાન્તરસ્થિતાઃ ॥ ૨૧૦॥

જનૌઘાનાં કોટયશ્ચ નાનાવાહનસંસ્થિતાઃ ।
સરય્વાં રામતીર્થે હિ ચૈત્રસ્નાનમથાદરાત્ ॥ ૨૧૧॥

તેષાં સમાગતાનાં હિ સમ્મર્દસ્તત્ર વૈ હ્યભૂત્ ।
સમ્મર્દાદ્રામચન્દ્રસ્ય તેષાં નાભૂચ્ચ દર્શનમ્ ॥ ૨૧૨॥

તદા તે મન્ત્રયામાસુર્નવ વિપ્રાઃ પરસ્પરમ્ ।
કથં શ્રીરાઘવસ્યાત્ર સમ્મર્દે દર્શનં ભવેત્ ॥ ૨૧૩॥

ચેજ્જાતં ત્વતિયત્નેન તર્હિ તત્કિં ન દર્શનમ્ ।
યાવત્સ્વસ્થેન મનસા રાઘવો ન નિરીક્ષિતઃ ॥ ૨૧૪॥

તાવત્તદ્દર્શનં નૈવ તુષ્ટિં નો જનયિષ્યતિ ।
તદા ચન્દ્રોઽબ્રવીજ્જ્યેષ્ઠસ્ત્વત્રૈવ રામદર્શનમ્ ॥ ૨૧૫॥

વયં તીવ્રેણ તપસા પ્રાપ્સ્યામસ્તપ્યતાં તપઃ ।
તચ્ચન્દ્રવચનં શ્રુત્વા પુનઃ પ્રોચુર્દ્વિજોત્તમાઃ ॥ ૨૧૬॥

એકકાલે તુ સર્વેષાં તપતામન્તરેણ હિ ।
કસ્યાદૌ રામચન્દ્રશ્ચ દાસ્યત્યત્ર પ્રદર્શનમ્ ॥ ૨૧૭॥

કસ્ય દાસ્યતિ પશ્ચાચ્ચ વિદિતં તદ્ભવિષ્યતિ ।
કસ્યાસ્માસુ દૃઢા ભક્તિર્વિદિતા સા ભવિષ્યતિ ॥ ૨૧૮॥

એવં પરસ્પરં ચોક્ત્વા તે સર્વે દ્વિજસૂનવઃ ।
ત્યક્તાહારા વાયુભક્ષાશ્ચૈકાન્તે તત્પરેણ હિ ॥ ૨૧૯॥

ગત્વાતિદૂરં સમ્મર્દાત્તેપુઃ સર્વે તપો મહત્ ।
તત્સર્વં રાઘવો જ્ઞાત્વા સર્વસાક્ષી જગત્પ્રભુઃ ॥ ૨૨૦॥

તેષાં સ્વદર્શનં દાતું નવમે દિવસે મુદા ।
મન્ત્રાયામાસ શ્રીરામઃ ક્ષણં ચિત્તે સમાસ્થિતઃ । ૨૨૧॥

એકકાલે તુ સર્વેષાં યદિ દાસ્યામિ દર્શનમ્ ।
તર્હ્યેવ તુષ્ટિઃ સર્વેષાં ભવિષ્યતિ ન ચેન્ન હિ ॥ ૨૨૨॥

અતોઽદ્યાહં કરિષ્યામિ નવ રૂપાણિ નિશ્ચયાત્ ।
એવં સમ્મન્ત્ર્ય શ્રીરામો લક્ષ્મણં પ્રાહ સાદરમ્ ॥ ૨૨૩॥

શિબિકામાનયસ્વાદ્ય બહિર્ગચ્છામ્યહં મુદા ।
તથેતિ રામવાક્યેન શિબિકાં લક્ષ્મણસ્તથા ॥ ૧૨૪॥

આનયામાસ દુતૈઃ સ રાઘવાય ન્યવેદયત્ ।
તદા સિંહાસનાદ્રામશ્ચોત્તીર્ય શિબિકાસ્થિતઃ ॥ ૨૨૫॥

બન્ધુભિમન્ત્રિવર્યૈશ્ચ સુહૃન્મિત્રાદિભિર્યુતઃ ।
બહિઃ શનૈરયોધ્યાયા યયૌ રામો મુદાન્વિતઃ ॥ ૨૨૬॥

તતસ્તં જનસમ્મર્દં સમતિક્રમ્ય રાઘવઃ ।
ચકાર નવ રૂપાણિ હ્યાત્મનઃ પરમેશ્વરઃ ॥ ૨૨૭॥

શિબિકાઃ સુહૃદો ભ્રાતૄન્દૂતાન્મિત્રાન્સવાહનાન્ ।
ચકાર નવધા રામસ્તદા સ ક્ષણમાત્રતઃ ॥ ૨૨૮॥

નિરીક્ષિતું સમાયાતા નાત્માનં તાન્ જનાનપિ ।
ચકાર નવધા રામસ્તદદ્ભુતમિવાભવત્ ॥ ૨૨૯॥

તતસ્તૈસ્તૈર્જનૈર્મિત્રૈર્દૂતૈર્બન્ધુજનૈઃ સહ ।
નવાનાં ભૂસુરાણાં હિ યયાવગ્રે રઘૂત્તમઃ ॥ ૨૩૦॥

તતસ્તે ભૂસુરાઃ સર્વે તદૈકસમયે પ્રભુમ્ ।
આત્મનઃ પુરતો રામં દદૃશુસ્તં પૃથક્ પૃથક્ ॥ ૨૩૧॥

તત્તુષ્ટમનસઃ સર્વે પ્રણેમૂ રઘુનન્દનમ્ ।
શિબિકાભ્યસ્તતો રામસ્ત્વવરુહ્ય પૃથક્ પૃથક્ ॥ ૨૩૨॥

નવરૂપધરાઃ સર્વાન્વિપ્રાનાલિઙ્ગ્ય સાદરમ્ ।
ઊચુર્મધુરયા વાચા પ્રસન્નમુખપઙ્કજાઃ ॥ ૨૩૩॥

ભો વિપ્રાઃ શ્રમિતા યૂયં યુષ્માકં કૃતનિશ્ચયમ્ ।
બુદ્ધ્વા વયં પૃથગ્રૂપૈર્જાતાઃ સ્મો નવધાઽદ્ય હિ ॥ ૨૩૪॥

એકકાલેઽત્ર તપતાં સર્વેષાં દર્શનં નિજમ્ ।

કસ્ય દેયં તુ પૂર્વં હિ પશ્ચાત્કસ્ય પ્રદીયતામ્ ॥ ૨૩૫॥

ઇતિ સમ્મન્ત્ર્ય હૃદયે ત્વથૈકસમયેન હિ ।
યુષ્માકં દર્શનં દત્તં વરયધ્વં વરાનિતઃ ॥ ૨૩૬॥

રામાણાં વચનં શ્રુત્વા તે પ્રોચુર્ભૂસુરોત્તમાઃ ।
યેનાસ્માકં ભવેત્કીર્તિઃ સ વરો દીયતાં તુ નઃ ॥ ૨૩૭॥

તત્તેષાં વચનં શ્રુત્વા રામાઃ પ્રોચુર્દ્વિજાન્પુનઃ ।
યુષ્માકં દર્શનાર્થં હિ નવરૂપધરા વયમ્ ॥ ૨૩૮॥

અદ્ય જાતા યતસ્તસ્માદ્યુષ્માકં નામભિઃ સદા ।
નવ રામાઃ પરાં ખ્યાતિં ગમિષ્યન્ત્યવનીતલે ॥ ૨૩૯॥

અસ્માકં નવ યત્કિઞ્ચિત્તત્પ્રિયં હિ ભવિષ્યતિ ।
તે તેષાં તુ રામાણાં વાક્યં શ્રુત્વા દ્વિજોત્તમાઃ ॥ ૨૪૦॥

સન્તુષ્ટાસ્તે નતા નેમુઃ સ્વં સ્વં રામં મુહુર્મુહુઃ ।
તદા સર્વે જના રામાન્ લક્ષ્મણાન્ ભરતાદિકાન્ ॥ ૨૪૧॥

આત્માનં નવધા જાતાન્દૃષ્ટ્વા વિસ્મયમાગતાઃ ।
તતો રામાઃ શિબિકાસુ સ્થિત્વા પૃષ્ટ્વા દ્વિજોત્તમાન્ ॥ ૨૪૨॥

પરાવૃત્ય યયુઃ સર્વે માર્ગે ત્વેકોઽભવત્પુનઃ ।
સર્વે જાતાસ્ત્વેકરૂપાસ્તથા તે વિસ્મયં યયુઃ ॥ ૨૪૩॥

તતો રામો બન્ધુભિશ્ચ પૂર્વવન્નગરીં યયૌ ।
ગત્વા ગેહે તુ સીતાયૈ સર્વં વૃત્તં ન્યવેદયત્ ॥ ૨૪૪॥

અતસ્તે નવ વિપ્રાણાં નામભિર્જગતીતલે ।
ખ્યાતિં રામા યયુસ્તત્ર નવ યદ્યચ્ચ તત્પ્રિયમ્ ॥ ૨૪૫॥

યથાર્કા દ્વાદશ પ્રોક્તા એકવિંશદ્ગણાધિપાઃ ।
રુદ્રા એકાદશ પ્રોક્તા યથાષ્ટ ભૈરવાઃ સ્મૃતાઃ ॥ ૨૪૬॥

નવ દુર્ગા યથા ત્વત્ર તથા રામા નવ સ્મૃતાઃ ।
પ્રિયં દ્વાદશ સૂર્યાય એકાદશ શિવપ્રિયમ્ ॥ ૨૪૭॥

એકવિંશત્પ્રિયં યદ્ગણેશાય મહાત્મને ।
પ્રિયમષ્ટ ભૈરવાય દુર્ગાયૈ તુ નવ પ્રિયમ્ ॥ ૨૪૮॥

યથા યથાઽત્ર રામાય નવ શિષ્ય પ્રિયં સદા ।
તસ્માન્નવવિધૈઃ પુષ્પૈરઞ્જલિસ્તત્પ્રિયો મતઃ ॥ ૨૪૯॥

ઇતિ શ્રીમદાનન્દરામાયણે મનોહરકાણ્ડે તૃતીયસર્ગાન્તર્ગતં
શ્રીરામબહિઃપૂજાવિધિવિધાનવિસ્તારં સમાપ્તમ્ ॥

Encoded and proofread by PSA Easwaran

*Shrirama Manasi and Bahih Puja Vidhi Vidhanam*
pdf was typeset on January 30, 2021

Please send corrections to *sanskrit@cheerful.com*